# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

**कक्षा**-शास्त्री-2(SEM-4) **प्रश्नपत्रम्** - ४ (Old) **गुणाः** - ७०

**विषयः** - संस्कृतसम्भाषणम् **कोड- OE- 244** **समयः** - ३ तः ६

**दिनाङ्कः** -०२/०४/२०१९ **सन्दर्भग्रन्थः**- द्वितीयदीक्षा - (प्रथमद्वितीयभागौ) व्यवहारप्रदीपः।

---

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ त्रिषु द्वयोः उत्तरं लिखत।** १०

(क) अधोलिखितक्रियापदानां पुरुषवचने लेख्ये।

उदाहरणम् - डयन्ते - <u>प्रथमपुरुषः</u> <u>बहुवचनम्</u>।

१ विद्येते _______ _______ ।

२ मोदामहे _______ _______ ।

३ खिद्ये _______ _______ ।

४ सेवसे _______ _______ ।

५ प्रकाशेते _______ _______ ।

६ पलायन्ते _______ _______ ।

७ सहेथे _______ _______ ।

८ वन्दध्वे _______ _______ ।

(ख) 'वन्द्' धातोः लट्-लोट्-लृट्-लङ्लकारेषु सर्वाणि रूपाणि लिखत।

(ग) 'गम्' धातोः लट्-लोट्-लङ-लृट्लकारेषु सर्वाणि कर्मणि रूपाणि लिखत।

**प्रश्नः २ द्वयोः किमपि एकम् उत्तरयत।** १०

(क) अधोलिखितक्रियापदानि उपयुज्य दश वाक्यानि रचयत।

(१) अन्वभवत्। (२) उपाविशम् (३) परिहरसि (४) लज्जते (५) कुरुते (६) शोभिष्यते

(७) ज्ञायते (८) भक्ष्ये (९) जायते (१०) वन्दते।

(ख) कोष्ठके सूचितं धातुमुपयुज्य रिक्तस्थानं पूरयत।

उदा. त्वम् उच्चैः मा <u>भाषस्व</u>। (भाष)

१ यूयं परीक्षायां सफलतां _______ । (लभ)

२ भवती भगवन्तं _______ । (सेव)

३ वयं सर्वस्य हितमेव _______ । (काम)

४ अहं निरन्तरं _______ । (वर्ध)

५ एषः संस्कृतं ज्ञात्वा _______ । (मोद)

६ पुत्राः मातरं _______ । (सेव)

७ वत्सौ युवां मा _______ । (खिद)

८ त्वं कतिचन दिनानि कष्टं _______ । (सह)

९ वयम् अनुदिनम् _______ । (एध)

१० भवान् एव अस्य कारणम् _______ । (ऊह)

## ॥ द्वितीयान्वितिः ॥ (Unit-2)

**प्रश्नः ३ त्रिषु द्वयोः उत्तरं लिखत ।** **१०**

(क) विशेषणविशेष्यभावं सोदाहरणं बोधयत ।

(ख) चित्-चनप्रयोगं कृत्वा पञ्चवाक्यानि रचयत ।

(ग) विशेष्यानुगुणं विशेषणानां रूपाणि विलिख्य पञ्चवाक्यानि लिखत ।

उदा. (दीर्घ) दीर्घाम् कथाम् ।

१ (पवित्र) _______ गङ्गाजलम् ।

२ (महत्) _______ श्रमेण ।

३ (शीतल) _______ वातावरणे ।

४ (उत्तम) _______ छात्राः ।

५ (स्वच्छ) _______ जलेन ।

**प्रश्नः ४ द्वयोरेकस्यैवोत्तरं लिखत ।** **१०**

(क) चित्-चन-प्रयोगं कृत्वा कतिशब्दस्य रूपाणि लिखत ।

(ख) सङ्ख्यावाचकपदानि उपयुज्य दशवाक्यानि रचयत ।

## ॥ तृतीयान्वितिः ॥ (Unit-3)

**प्रश्नः ५ त्रिषु द्वयोरुत्तरं लिखत ।** **१०**

१ पठ्धातोः पुँल्लिङ्गे शत्रन्तरूपाणि लिखत ।

२ शत्रन्तपदानि उपयुज्य पञ्चवाक्यानि लिखत ।

३ शानच्प्रत्ययान्तानि पदानि उपयुज्य पञ्चवाक्यानि रचयत ।

**प्रश्नः ६ शतृशानच्-रूपाणां प्रयोगं कृत्वा दशवाक्यानि लिखत ।** **१०**

अथवा **सोदाहरणं शतृशानच्रूपाणां प्रयोगं बोधयत ।**

**प्रश्नः ७ केषाञ्चन दशप्रश्नानामुत्तरं लिखत ।** **१०**

१ 'भवति' इत्यस्य कर्मणि किम् रूपम् ?

२ एध-धातोः लटि प्रथमपुरुषे रूपाणि लिखत ।

३ 'अहं पुस्तकं पठामि' कर्मणि परिवर्तयत ।

४ 'अन्वगच्छत्' अत्र कः उपसर्गः?

५ 'प्रत्यागमिष्यति' उपसर्गौ पृथक् कुरुत ।

६ 'खगः आकाशे डयते' बहुवचने परिवर्तयत ।

७ 'शिष्यः गुरुं सेवते' अस्य कर्मवाच्यं कथम्?

८ 'अपहरति' अस्य लङि किं रूपम्?

९ चि-धातोः लटि प्रथमपुरुषे कर्मणि रूपाणि लिखत ।

१० 'नीलः घटः' इत्यत्र विशेषणं किम्?

११ यत् वैशिष्ट्यं बोधयति तत् किम्?

१२ 'कः + चित्' किम् रूपम्?

१३ 'सः पठनसमकालं लिखति' शत्रन्तप्रयोगे परिवर्तयत ।

१४ पठ्-धातोः स्त्रियाम् प्रथमाविभक्त्येकवचने शत्रन्तरूपं किम्?

१५ 'वन्दमानः' इति कीदृशं रूपम्?